## Navagraha Homam

ॐ ह्रां ह्रीं ह्रौं सः सूर्याय नमस्स्वाहा ॥
om̐ hrām̐ hrīm̐ hraum̐ saḥ sūryāya namas svāhā ||
ॐ श्रां श्रीं श्रौं सः चंद्राय नमस्स्वाहा ॥
om̐ śrām̐ śrīm̐ śraum̐ saḥ candrāya namas svāhā ||
ॐ क्रां क्रीं क्रौं सः भौमाय नमस्स्वाहा ॥
om̐ krām̐ krīm̐ kraum̐ saḥ bhaumāya namas svāhā ||
ॐ ब्रां ब्रीं ब्रौं सः बुधाय नमस्स्वाहा ॥
om̐ brām̐ brīm̐ braum̐ saḥ budhāya namas svāhā ||
ॐ ग्रां ग्रीं ग्रौं सः गुरवे नमस्स्वाहा ॥
om̐ grām̐ grīm̐ graum̐ saḥ gurave namas svāhā ||
ॐ द्रां द्रीं द्रौं सः शुक्राय नमस्स्वाहा ॥
om̐ drām̐ drīm̐ draum̐ saḥ śukrāya namas svāhā ||
ॐ प्रां प्रीं प्रौं सः शनैश्चराय नमस्स्वाहा ॥
om̐ prām̐ prīm̐ praum̐ saḥ śanaiścarāya namas svāhā ||
ॐ भ्रां भ्रीं भ्रौं सः राहवे नमस्स्वाहा ॥
om̐ bhrām̐ bhrīm̐ bhraum̐ saḥ rāhave namas svāhā ||
ॐ स्रां स्रीं स्रौं सः केतवे नमस्स्वाहा ॥
om̐ srām̐ srīm̐ sraum̐ saḥ ketave namas svāhā ||

### 11. Upanayana

❖ The guru covers the disciple with a cloth and asks;-

को वा आश्रमस्ते तनय ब्रूहि किं ते मनोगतम् ।
ko vā āśramaste tanaya brūhi kim̐ te manogatam |
*What is the ashrama that you desire my son?*

❖ The disciple holds the guru's feet and replies;-

करोतु मामाश्रमिणं ब्रह्म-विद्या उपदेशितः karotu mām āśramiṇam̐ brahma-vidyā upadeśitaḥ
*First instruct me in divine knowledge and then in that of the householder.*

अधीहि भोः सावित्रीं भो अनुब्रूहि । adhīhi bhoḥ sāvitrīm̐ bho anubrūhi |
*Teach me O Reverend Sir, the sacred verse of the Savitri.*

❖ The guru or the father then whispers the gāyatri mantra in his right ear.

ॐ भूः । तत्सवितुः वरेण्यं ।
ॐ भुवः । भर्गो देवस्य धीमहि ।
ॐ सुवः । धियो यो नः प्रचोदयात् ।
ॐ भूः । तत्सवितुः वरेण्यं । भर्गो देवस्य धीमहि ।
ॐ सुवः । धियो यो नः प्रचोदयात् ॥

ॐ भूः भुवः सुवः । तत्स॑वि॒तुः व॑रे॒ण्यं भर्गो॑ देवस्य धीमहि । धियो॒ यो नः॑ प्रचोदया॑त् ॥

ॐ भूः भुवः सुवः । तत्स॑वि॒तुः व॑रे॒ण्यं भर्गो॑ देवस्य धीमहि । धियो॒ यो नः॑ प्रचोदया॑त् ॥

oṁ bhūḥ | tat sa̍vi̱tuḥ vare̎ṇyaṁ |
oṁ bhuvaḥ | bhargo̍ devasya dhīmahi |
oṁ suvaḥ | dhiyo yo naḥ pracodayāt |
oṁ bhūḥ | tat savituḥ vareṇyaṁ | bhargo devasya dhīmahi |
oṁ suvaḥ | dhiyo yo naḥ pracodayāt ||
oṁ bhūḥ bhuvaḥ suvaḥ | tat savituḥ vareṇyaṁ bhargo devasya dhīmahi | dhiyo yo naḥ pracodayāt ||

oṁ bhūḥ bhuvaḥ suvaḥ | tat savituḥ vareṇyaṁ bhargo devasya dhīmahi | dhiyo yo naḥ pracodayāt ||

*Let us meditate upon the sublime, all-pervading eternal Truth, the great immanent and lustrous energy, adored by the self-controlled; Savita - the effulgent and omnipresent One, whose manifested form the world is, the Creator May Bharga, who witnesses all, and is the Lord of all, direct and engage our mind, intelligence and senses towards those acts, which lead to dharma, artha, kama and moksha.*

## Samidha-dānam

- ❖ The baṭuka then does samidha-dānam.

ॐ अग्नये समिधमाहार्षं बृहते जातवेदसे, यथा त्वमग्ने समिधा समिध्यसि, एवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्म-वर्चसेन समिंधे, जीव-पुत्रो मामाचार्यो मेधावि अहमसानि, अनिराकरिष्णुर्यशस्वी ब्रह्म-वर्चस्य अन्नादो भूयासगुं स्वाहा ॥

oṁ agnaye samidham āhārṣaṁ bṛhate jātavedase, yathā tvam agne samidhā samidhyasi, evam aham āyuṣā medhayā varcasā prajayā paśubhir brahma-varcasena samindhe, jīva-putro mām ācāryo medhāvi aham asāni, anirākariṣṇur yaśasvī brahma-varcasya annādo bhūyāsaguṁ svāhā ||

*'To Agni I have brought a piece of wood, to the great Jātavedas. As you, Agni, are inflamed by wood, thus I am inflamed by life, insight, vigour, offspring, cattle, holy radiance. May my teacher be the father of living sons; may I be full of insight, not forgetful (of what I have learned); may I become full of glory, of splendour, of holy radiance, an enjoyer of food. Svāhā!*

ॐ एषा ते अग्ने समित्तया वर्धस्व चा चप्यायस्व वर्धिषीमहि च वयमाचप्यासिषीमहि स्वाहा ॥

oṁ eṣā te agne samittayā vardhasva cā capyāyasva vardhiṣīmahi ca vayamāc apyāsiṣīmahi svāhā ||

*To Agni I have brought a piece of wood, to the great Jātavedas. Through that piece of wood increase O Agni; through the study of the Veda (may) we (increase). Svāhā!'*

- ❖ The initiate now offers three oblations into the sacred fire with the following;

ॐ भूर्भुवस्सुवस्स्वाहा ॥ oṁ bhūr-bhuvas-suvas-svāhā ||

- ❖ Warming his hands on the fire the lad should touch his face with each of the following mantras:

ॐ तनुपा अग्नेऽसि तन्वं ने पाहि ॥ १ ॥ oṁ tanupā agne'si tanvaṁ ne pāhi || 1 ||

ॐ आयुर्दा अग्नेऽस्यायुर्मे देहि ॥ २ ॥ oṁ āyurdā agne'syāyur me dehi ॥ 2 ॥
ॐ वर्चोदा अग्नेऽसि वर्चो मे देहि ॥ ३ ॥ oṁ varcodā agne'si varco me dehi ॥ 3 ॥
ॐ अग्ने यन्मे तन्वा ऊनं तन्म आपृण ॥ ४ ॥ oṁ agne yan me tanvā ūnaṁ tanma āpṛṇa ॥ 4 ॥
ॐ मेधां मे देवः सविता आदधातु ॥ ५ ॥ oṁ medhāṁ me devaḥ savitā ādadhātu ॥ 5 ॥
ॐ मेधां मे देवि सरस्वती आदधातु ॥ ६ ॥ oṁ medhāṁ me devi sarasvatī ādadhātu ॥ 6 ॥
ॐ मेधां मेऽश्विनौ देवावाधत्तांपुष्कर-स्रजौ ॥ ७ ॥
oṁ medhāṁ me'śvinau devāv ādhattām puṣkara-srajau ॥ 7 ॥

❖ He should now touch each part of the body as mentioned below:

ॐ अंगानि च म आप्यायंताम् । oṁ aṅgāni ca ma āpyāyantām । *(shoulders)*
ॐ वाक्च आप्यायंताम् । oṁ vāk ca āpyāyantām । *(mouth)*
ॐ प्राणश्च म आप्यायंताम् । oṁ prāṇaśca ma āpyāyantām । *(nose)*
ॐ चक्षुश्च म आप्यायंताम् । oṁ cakṣuśca ma āpyāyantām । *(eyes)*
ॐ श्रोत्रं च म आप्यायंताम् ॥ oṁ śrotraṁ ca ma āpyāyantām ॥ *(ears)*

❖ The following four mantras are chanted while applying the ashes of the sacred fire:

ॐ त्रायुषं जमदग्नेः oṁ tryāyuṣaṁ jamadagneḥ *(forehead)*
ॐ कश्यपस्य त्रायुषं oṁ kaśyapasya trāyuṣaṁ *(throat)*
ॐ यद्देवेषु त्रायुषं oṁ yad deveṣu trāyuṣaṁ *(right shoulder)*
ॐ तन्नो अस्तु त्रायुषं oṁ tan no astu trāyuṣaṁ *(heart)*

❖ The ācārya then offers the *sviṣṭhakṛt* oblations and then pūrṇahuti.

❖ The initiate takes a begging bowl and goes to his mother and other ladies and begs rice and money from them.

भवति भिक्षाम्देहि bhavati bhikṣām dehi

❖ If the Upanayana is done as a prelude to marriage then he returns to the guru who instructs him as follows;-

ब्रह्म-चर्योचितं वेशं वत्सेदानीं परित्यज । शांभवोदित मार्गेण देवान्पितृन्समर्चय ॥
brahma-caryocitaṁ veśaṁ vatsedānīṁ parityaja ।
śāmbhavodita mārgeṇa devān pitṛn samarcaya ॥

*My son discard the garments of a brahmacari, and pay your respects to the devas and ancestors, according to the method revealed by Shambhu.*

ब्रह्म-विद्योपदेशेन पवित्रं ते कलेवरम् । प्राप्ता ग्रहस्थाश्रमिता तदुक्तं कर्म कल्पय ॥
brahma-vidyopadeśena pavitraṁ te kalevaram ।
prāptā grhasthāśramitā tad uktaṁ karma kalpaya ॥

*Thy body is sanctified by the instructions that you have received in divine wisdom. Now that you have reached the stage of a householder, engage yourself in those duties appropriate to that mode of life.*

उपवीत द्वयं दिव्य वस्त्रालंकरणानि च । गृहाण पादुकाच्छत्रं गंध माल्यानुलेपनम् ॥

upavīta dvayaṁ divya vastrālaṅkaraṇāni ca |
gṛhāṇa pādukācchatraṁ gandha mālyānulepanam ||

*Wear two sacred threads, two radiant pieces of cloth, adornments, shoes, umbrella, fragrant garland and sandal paste.*

जितेंद्रियः सत्य-वादी ब्रह्म-ज्ञान परो भव । स्वाध्यायाऽश्रम कर्माणि यथा धर्मेण साधय ॥
jitendriyaḥ satya-vādī brahma-jñāna paro bhava |
svādhyāyā'śrama karmāṇi yathā dharmeṇa sādhaya ||

*Control your senses, be truthful and devoted to the acquisition of spiritual knowledge and the study of the Vedas, Discharge the duties of a householder according to the instructions of the dharma shastras.*

- The initiate changes his robes, adorns himself with garlands etc and sits silently opposite the guru to receive the blessing.

## Āśirvādam

ॐ त्वं जीव शरदः शतं वर्द्धमानः, आयुष्मांतेजस्वी वर्चस्वी विद्यावान्गुणवान्भूयाः । (मले)
oṁ tvaṁ jīva śaradaḥ śataṁ varddhamānaḥ, āyuṣmān tejasvī varcasvī vidyāvān guṇavān bhūyāḥ | (male)

ॐ त्वं जीव शरदः शतं वर्द्धमाना, आयुष्मती तेजस्वती वर्चस्वती विद्यावती गुणवती भूयाः । (फ़ेमले)
oṁ tvaṁ jīva śaradaḥ śataṁ varddhamānā, āyuṣmatī tejasvatī varcasvatī vidyāvatī guṇavatī bhūyāḥ | (female)

स्वस्ति मंत्रार्थाः सत्यास्सफलास्संतु इति भवंतो महांतो अनुगृह्णंतु ॥
svasti mantrārthāḥ satyās saphalās santu iti bhavanto mahānto anugṛhṇantu ||

*May this benediction pronounced be truthful and yield its rewards by your blessings.*

अस्य मुहूर्तः सुमुहूर्तो भूयादिति भवंतो महांतो अनुगृह्णंतु ॥
asya muhūrtaḥ sumuhūrto bhūyād iti bhavanto mahānto anugṛhṇantu ||

*By your blessing may this moment be an auspicious one.*

अस्य कुमारस्य वेदोक्तं दीर्घं आयुष्यं भूयादिति भवंतो महांतो अनुगृह्णंतु ॥
asya kumārasya vedoktaṁ dīrghaṁ āyuṣyaṁ bhūyād iti bhavanto mahānto anugṛhṇantu ||

*By your blessing may this boy have long life as mentioned in the Vedas.*

तल्-लग्न अपेक्षया आदित्यादि नवानां ग्रहानामानुकूल्यं भूयादिति भवंतो महांतो अनुगृह्णंतु ॥
tal-lagna apekṣayā ādityādi navānāṁ grahānām ānukūlyaṁ bhūyād iti bhavanto mahānto anugṛhṇantu ||

*By your blessing may all the nine planets be favourably disposed inspite of the lagna.*

अयं बटुः व्यास इव पुराणेषु पाणिनिरिव व्याकरणे रामानुज इव ब्रह्म-विद्यायां जनक इव तत्त्व-ज्ञाने प्रह्लादिव भगवद्भक्तौ हरिश्चंद्र इव सत्य-वचने भीष्म इव ब्रह्मचर्ये मार्कंडेय इव चिरंजीवित्वे च भूयादिति भवंतो महांतो अनुगृह्णंतु ॥
ayaṁ baṭuḥ vyāsa iva purāṇeṣu pāṇinir iva vyākaraṇe rāmānuja iva brahma-vidyāyāṁ janaka iva tattva-jñāne prahlād iva bhagavad bhaktau hariścandra iva satya-vacane bhīṣma iva brahmacarye mārkaṇḍeya iva cirañjīvitve ca bhūyād iti bhavanto mahānto anugṛhṇantu

*By your blessing may this lad be like Vyasa in literature, like Panini in knowledge of grammer, like Ramanuja in knowledge of God, like Janaka in his grasp of philosophy, like Prahlada in devotion to God, like Harischandra in his love of speaking the truth, like Bhishma in his vow of continence, like Markandeya in longevity*

सर्वे जनाः नीरोगाः निर्-उपद्रवाः सद्-आचार-संपन्ना आढ्या निर्-मत्सर दयालवश्च भूयासुर् इति भवंतो महांतो अनुगृह्णंतु ॥
sarve janāḥ nīrogāḥ nir-upadravāḥ sad-ācāra-sampannā āḍhyā nir-matsara dayālavaśca bhūyāsur iti bhavanto mahānto anugṛhṇantu ||

*May everyone be free from illness, and tribulations, may all people become virtuous, prosperous, free from envy, and compassionate.*

समस्त सन्मंगलानि संतु । उत्तरोत्तर अभिवृद्धिरस्तु ॥
samasta sanmaṅgalāni santu | uttarottara abhivṛddhir astu || 14 ||

*May there be auspiciousness ever expanding.*



# RITU ŚĀNTI

## Prathama Rajodarśana śāntiḥ

❖ Perform the usual preliminaries.

### Pradhana Saṅkalpaṁ

हरिः ॐ तत्सत् गोविंद x ३ भगवतो महा-पुरुषस्य विष्णोर् आज्ञया, प्रवर्तमानस्य आद्य ब्रह्मणो द्वितीय परार्धे श्वेत-वराह कल्पे वैवस्वत मन्वंतरे अष्ठाविंशतितमे कलि युगे कलि युगस्य प्रथम पादे जंबूद्वीपे मेरोर् _______ दिग्भागे __________ देशे __________ नगरे व्यवहारिकानां प्रभवादि शष्टि संवत्सरानां मध्ये चंद्रमानेन __________ संवत्सरे __________ अयने __________ ऋतौ __________ मासोत्तमे मासे __________ पक्षे __________ तिथौ __________ वासरे __________ नक्षत्रे युक्तायाम् शुभ योगे शुभ करणे एवं ग्रह गुण विशेषण विशिष्ठायां अस्यां शुभ तिथौ;

hariḥ oṁ tatsat govinda x 3 bhagavato mahā-puruṣasya viṣṇor ājñayā, pravartamānasya ādya brahmaṇo dvitīya parārdhe śveta-varāha kalpe vaivasvata manvantare aṣṭhāviṁśatitame kali yuge kali yugasya prathama pāde jambūdvīpe meror _______ digbhāge __________ deśe __________ nagare vyavahārikānāṁ prabhavādi śaṣṭi saṁvatsarānāṁ madhye candramānena __________ saṁvatsare __________ ayane __________ ṛtau __________ māsottame māse __________ pakṣe __________ tithau __________ vāsare __________ nakṣatre yuktāyām śubha yoge śubha karaṇe evaṁ graha guṇa viśeṣaṇa viśiṣṭhāyāṁ asyāṁ śubha tithau;

मम कुमार्या प्रथम रजसः प्रादुर्भाव काले तिथि वार नक्षत्र योग करण लग्नादिभिः यो दोषस्समज्जनि तद्दोष परिहारर्थं सर्वारिष्ट शांत्यर्थं सर्वाभिष्ट सिद्ध्यर्थं पुराणोक्त प्रकारेण प्रथमार्तव शांति जप होम कर्म करिष्ये ॥

mama kumāryā prathama rajasaḥ prādurbhāva kāle tithi vāra nakṣatra yoga karaṇa lagnādibhiḥ yo doṣas samajjani tad doṣa parihāra arthaṁ sarvāriṣṭa śāntyarthaṁ sarvābhiṣṭa siddhyarthaṁ purāṇokta prakāreṇa prathamārtava śānti japa homa karma kariṣye ||

*With the first appearance of menses in my daughter, I shall now perform the ceremonies mentioned in the Purāṇas for the pacification of the negative influences of the planetary positions, for achievement of beneficial outcomes, we will now commission the chanting of mantras and offering sacrifices for peace.*

❖ Spread rice, paddy, moong and til with a cloth inbetween them — 4 levels, make 8 petal padmas, place 3 kumbhas
❖ Fill the kumbhas with the water

पूता ब्रह्म पवित्रेण, पूत सूर्यस्य रश्मिभिः । सर्व तीर्थ जलं पुण्यं, पावनं सर्व कारणं । विष्णु पादोद्भवं शुद्धम्, सर्व मंगल दायिना ॥

pūtā brahma pavitreṇa, pūta sūryasya raśmibhiḥ | sarva tīrtha jalaṁ puṇyaṁ, pāvanaṁ sarva kāraṇaṁ | viṣṇu pādodbhavaṁ śuddham, sarva maṅgala dāyinā ||

❖ On the top place 5 mango leaves and a coconut and decorate as for punyāha vācanam.

## Invoke Gaṅgā

ध्यायेत् भागिरतीम् देवीं मकरासन-सुस्थिताम् । पद्म-हस्तां पद्म-वक्त्रां सुधा-कलश-धरिनीं ॥
वरदाभय-दं देवीं सर्वाभरण भूषिताम् । विष्णु-पाद समुद्भूताम् सर्व दुरित-नाशिनीं ॥

dhyāyet bhāgiratīm devīṁ makarāsana-susthitām ǀ
padma-hastāṁ padma-vaktrāṁ sudhā-kalaśa-dharinīṁ ǁ
varadābhaya-daṁ devīṁ sarvābharaṇa bhūṣitām ǀ
viṣṇu-pāda samudbhūtām sarva durita-nāśinīṁ ǁ

*One should meditate on the goddess Bhagirathi with a lotus-face who is seated on a shark. She holds a lotus in her hand and a pitcher of nectar. She displays the gestures of boons and fearlessness and is adorned with all kinds of ornaments. She is born at the feet of Lord Viṣṇu and destroys all evils.*

ॐ त्रिपद-गामिनि विद्महे । रुद्र-पत्न्यै च धीमहि । तन्नो गंगा प्रचोदयात् ॥
oṁ tripada-gāmini vidmahe ǀ rudra-patnyai ca dhīmahi ǀ tanno gaṅgā pracodayāt ǁ

❖ Offer upacāras

ॐ गंगायै नमः । महा-भद्रायै । माहा-मायायै । वर-प्रदायै । नंदिन्यै । पद्म-निलयायै । मीनाक्ष्यै । पद्म-वक्त्रकायै । भागिरत्यै । पद्म-भृते । ज्ञान-मुद्रायै । रमायै । परायै । काम-रुपायै । महा-विद्यायै । महा-पातक-नाशिन्यै । महा-श्रयायै । मालिन्यै । महा- भोगायै । महा-भुजायै ॥

oṁ gaṅgāyai namaḥ ǀ mahā-bhadrāyai ǀ māhā-māyāyai ǀ vara-pradāyai ǀ nandinyai ǀ padma-nilayāyai ǀ mīnākṣyai ǀ padma-vaktrakāyai ǀ bhāgiratyai ǀ padma-bhṛte ǀ jñāna-mudrāyai ǀ ramāyai ǀ parāyai ǀ kāma-rūpāyai ǀ mahā-vidyāyai ǀ mahā-pātaka-nāśinyai ǀ mahā-śrayāyai ǀ mālinyai ǀ mahā- bhogāyai ǀ mahā-bhujāyai ǁ

❖ Gaṅgā aṣṭhottaram can also be recited.

इदं तोयं यद् विमलं पवित्रं मंगलं परम् । सर्व कलि कलुषञ् च प्रशमनं नमस् स्वाहा ॥

idaṁ toyaṁ yad vimalaṁ pavitraṁ maṅgalaṁ param ǀ
sarva kali kaluṣañ ca praśamanaṁ namas svāhā ǁ

*This water is pure, holy and supremely auspicious. Obeisances to you, who remove all the sins of Kali-yuga.*

शुद्ध क्लेश शुद्ध मल, शुद्ध पातक शुद्ध विघ्न शुद्ध पाप निरुपद्रव, ॐ जल निधि महा शक्ति हुं फट् ॥

śuddha kleśa śuddha mala, śuddha pātaka śuddha vighna
śuddha pāpa nirupadrava, oṁ jala nidhi mahā śakti huṁ phaṭ ǁ

*Purified of suffering, purified of impurities, purified of sins, purified of obstacles, purified of sins, purified of trouble.*

अप्सु देव पवित्राणि गंगा देवि नमोऽस्तु ते । सर्व क्लेश विनाशनं तोयेन परिशुद्ध्यते ॥

apsu deva pavitrāṇi gaṅgā devi namo'stu te ǀ
sarva kleśa vināśanaṁ toyena pariśuddhyate ǁ

*O goddess Ganga, I offer my respectful obeisances unto You, whose waters are holy. Water destroys all troubles and purifies the body.*

# Invocation of Gods

- ❖ Invoke the gods in 2nd kalaśa

**Brahma**

ब्रह्मा चतुर्मुखोपेतः चतुर्दोर्दंड मंडितः । स्रग् दंडाक्ष कुशोपेतः किरीटी हंस-वाहनः ॥

brahmā catur-mukhopetaḥ catur-dordaṇḍa maṇḍitaḥ ।
srag daṇḍākṣa kuśopetaḥ kirīṭī haṁsa-vāhanaḥ ॥

**Viṣṇu**

विष्णुश्च चतुर्भुजो मौली शंख-चक्र गदाब्ज-धृक् । नीलांबुद प्रतीकाशो गरुडासन संस्थितम् ॥

viṣṇuśca caturbhujo mauḷī śaṅkha-cakra gadābja-dhṛk ।
nīlāmbuda pratīkāśo garuḍāsana saṁsthitam ॥

**Śiva**

अग्नि-मध्ये स्थितं रुद्रं नील-कंटं त्रिलोचनम् । व्याख्या मुद्रानल ज्ञान शूल-हस्तं चतुर्भुजम् ।

agni-madhye sthitaṁ rudraṁ nīla-kaṇṭaṁ trilocanam ।
vyākhyā mudrānala jñāna śūla-hastaṁ caturbhujam ।

**Varuṇa**

वरुणं श्वेत-वर्णं च पाश-हस्तं रुजासनम् । मौक्तिकालंकृतं देवं तीर्थ नाथं अहं भजे ॥

varuṇaṁ śveta-varṇaṁ ca pāśa-hastaṁ rujāsanam ।
mauktikālaṅkṛtaṁ devaṁ tīrtha nāthaṁ ahaṁ bhaje ॥

**Sūrya**

द्वि-भुजं पद्म-हस्तं च वरदं मकुटान्वितम् । ध्यायेत्-दिवाकरं देवं सर्व-अभिष्ट प्रदायकम् ॥

dvi-bhujaṁ padma-hastaṁ  ca varadaṁ makuṭānvitam ।
dhyāyet-divākaraṁ devaṁ sarva-abhiṣṭa pradāyakam ॥

ॐ आदित्यादि नवग्रह देवताभ्यो नमः.    oṁ ādityādi navagraha devatābhyo namaḥ

- ❖ Offer 16 upacāras

सर्वासाम् देवतानां ध्यायामि, आवाहयामि ……………… etc.।
sarvāsām devatānāṁ dhyāyāmi, āvāhayāmi …… etc.

- ❖ invoke Indrani in 3rd Kalaśa

## Invocation of Indrākṣī

इंद्राक्षीं द्विभुजां देवीं पीत-वस्त्र-द्वयान्विताम् ।  वाम-हस्ते वज्र-धरां दक्षिणेन वर-प्रदाम् ॥
इंद्राक्षीं सहस्र-युवतीं नानालंकार-भूषिताम् ।  प्रसन्न-वदनांभोजाम्-अप्सरोगण-सेविताम् ॥

indrākṣīṁ dvibhujāṁ devīṁ pīta-vastra-dvayānvitām ।
vāma-haste vajra-dharāṁ dakṣiṇena vara-pradām ॥
indrākṣīṁ sahasra-yuvatīṁ nānālaṅkāra-bhūṣitām ।
prasanna-vadanāmbhojām-apsarogaṇa-sevitām ॥

*The goddess Indrākṣi with eyes like the lotus flower has two arms and is dressed in two yellow garments. She holds a thunderbolt in her left hand and bestows boons with her right.*
*She has a thousand-eyes, youthful with eyes like lotuses, and she is adorned with various ornaments. She has a cheerful face and a lotus flower, and is served by hosts of nymphs.*

ॐ इंद्राण्यै नमः        om indrāṇyai namaḥ

❖ offer 16 upacaras

ॐ गजत्-वजायै विद्महे । वज्र-हस्तायै धीमहि । तन्नो इंद्राणि प्रचोदयात् ॥
oṁ gajat-vajāyai vidmahe | vajra-hastāyai dhīmahi | tanno indrāṇi pracodayāt ||

**arcana –** अर्चन – इंद्राक्ष्यै नमः । देव्यै । गौर्यै । शाकंभर्यै । दुर्गायै । नाम्नीति विश्रुता । नित्यानंदायै । निराहारायै । निष्कलायै । कात्यायन्यै । महा-देव्यै । चंद्र-घंटायै । सावित्र्यै । ब्रह्म-वादिन्यै । कृष्ण-पिंगलायै । वज्रिन्यै ॥
indrākṣyai namaḥ | devyai | gauryai | śākambharyai | durgāyai | nāmnīti viśrutā | nityānandāyai | nirāhārāyai | niṣkalāyai | kātyāyanyai | mahā-devyai | candra-ghaṇṭāyai | sāvitryai | brahma-vādinyai | kṛṣṇa-piṅgalāyai | vajrinyai ||

**Namaskāra**

सर्व मंगल-मांगल्ये शिवे सर्वार्थ-साधिके । शरण्ये त्र्यंबके देवि नारायणि नमोऽस्तुते ॥
sarva maṅgala-māṅgalye śive sarvārtha-sādhike |
śaraṇye tryambake devi nārāyaṇi namo'stute ||

❖ Recite the following stotram or the mālā mantra which follows.

**Stotram**

वज्रिणी पूर्वतः पातु चाग्नेय्यां परमेश्वरी । दंडिनी दक्षिणे पातु नैर्ऋत्यां पातु खड्गिनी ॥ १ ॥
vajriṇī pūrvataḥ pātu cāgneyyāṁ parameśvarī |
daṇḍinī dakṣiṇe pātu nairṛītyāṁ pātu khaḍginī || 1 ||
*May Vajrini protect me in the east and may the goddess Parshvarī protect me in the south-east. May Daṇḍīnī protect me on the south, and may Khaḍginī protect me on the south-west.*

पश्चिमे पाश-धारी च ध्वजस्था वायु-दिङ्मुखे । कौमोदकी तथोदीच्यां पात्वैशान्यां महेश्वरी ॥ २ ॥
paścime pāśa-dhārī ca dhvajasthā vāyu-diṅmukhe |
kaumodakī tathodīcyāṁ pātvaiśānyāṁ maheśvarī || 2 ||
*The noose-bearer (Varuna) protects us on the west and Vayu - the flag-bearer from the North-west. May Kaumodakī protect me in the north and Maheśvarī in the northeast.*

उर्ध्वदेशे पद्मिनी मामधस्तात् पातु वैष्णवी । एवं दश-दिशो रक्षेत् सर्वदा भुवनेश्वरी ॥ ३ ॥
urdhvadeśe padminī māmadhastāt pātu vaiṣṇavī |
evaṁ daśa-diśo rakṣet sarvadā bhuvaneśvarī || 3 ||
*May Lakshmi of the lotus flower protect me above and the Vaiṣṇavī protect me from below. In this way the goddess of fortune should always protect the ten directions.*

इंद्राक्षी नाम सा देवी दैवतैः समुदाहृता । गौरी शाकंभरी देवी दुर्गा नाम्नीति विश्रुता ॥ ४ ॥
indrākṣī nāma sā devī daivataiḥ samudāhṛtā |
gaurī śākambharī devī durgā nāmnīti viśrutā || 4 ||
*The goddess Indrakṣī is worshiped by the gods. The goddess Gaurī is also known as Śākambhārī and is also known as Durgā.*

ॐ ह्रीं श्रीं इंद्राक्ष्यै नमः, ॐ नमो भगवति इंद्राक्षि, सर्वजन-सम्मोहिनि । कालरात्रि नारसिंहि सर्व शत्रु संहारिणि । अनले अभये अजिते अपराजिते महा-सिंह-वाहिनि । महिषासुर मर्दिनि हन हन, मर्दय मर्दय, मारय मारय, शोषय शोषय, दाहय दाहय, महा-ग्रहान् संहर संहर । यक्ष-ग्रह राक्षस-ग्रह-स्कंध-ग्रह विनायक-ग्रह बाल-ग्रह कुमार-ग्रह भूत-ग्रह प्रेत-ग्रह-पिशाच-ग्रहादीन् मर्दय मर्दय । भूत-ज्वर प्रेत-ज्वर -पिशाच-ज्वरान् संहर संहर

। धूम-भूतान् सन्-द्रावय सन्-द्रावय । शिरश्-शूल-कटि-शूलांग-शूल-पार्श्व-शूल- पांडु-रोगादीन् संहर संहर । य-र-ल-व-श-ष-स-ह । सर्व ग्रहान् तापय तापय । संहर संहर । छेदय छेदय, ह्रां ह्रीं ह्रूं फट् स्वाहा ॥
oṁ hrīṁ śrīṁ indrākṣyai namaḥ, oṁ namo bhagavati indrākṣi, sarvajana-sammohini। kālarātri nārasiṁhi sarva śatru saṁhāriṇi। anale abhaye ajite aparājite mahā-siṁha-vāhini। mahiṣāsura mardini hana hana, mardaya mardaya, māraya māraya, śoṣaya śoṣaya, dāhaya dāhaya, mahā-grahān saṁhara saṁhara। yakṣa-graha rākṣasa-graha-skandha-graha vināyaka-graha bāla-graha kumāra-graha bhūta-graha preta-graha-piśāca-grahādīn mardaya mardaya। bhūta-jvara preta-jvara -piśāca-jvarān saṁhara saṁhara। dhūma-bhūtān san-drāvaya san-drāvaya। śiraś-śūla-kaṭi-śūlāṅga-śūla-pārśva-śūla- pāṇḍu-rogādīn saṁhara saṁhara। ya-ra-la-va-śa-ṣa-sa-ha। sarva grahān tāpaya tāpaya। saṁhara saṁhara। chedaya chedaya, hrāṁ hrīṁ hrūṁ phaṭ svāhā ॥

## Agni-mukham

ॐ भूर्भुवस्सुवः तारण नाम अग्निम् आवाहयामि स्थापयामि ।
ॐ तारण नाम अग्नये नमः । सुप्रतिष्ठो वरदो भव ॥
oṁ bhūr-bhuvas-suvaḥ tāraṇa nāma agnim āvāhayāmi sthāpayāmi।
oṁ tāraṇa nāma agnaye namaḥ। supratiṣṭho varado bhava ॥

## Navagraha homam

### Sūrya

ॐ आरोग्य-दाय स्वाहा । सूर्याय इदं न मम ॥
oṁ ārogya-dāya svāhā। sūryāya idaṁ na mama ॥

### Candra

ॐ क्लीं ह्रीं ऐं अमृत करामृतं प्लावय प्लावय स्वाहा । सोम ग्रहाय इदं ॥
oṁ klīṁ hrīṁ aiṁ amṛta karāmṛtaṁ plāvaya plāvaya svāhā। somagrahāya idaṁ ॥

### Angaraka

ॐ ऐं ह्रां ह्रीं सर्व दुष्टान्-नाशय नाशय स्वाहा । कुज ग्रहाय इदं ॥
oṁ aiṁ hrāṁ hrīṁ sarva duṣṭān-nāśaya nāśaya svāhā। kuja grahāya idaṁ ॥

### Budha

ॐ ह्रीं श्रीं सौम्य सर्वान् कामान् पूरय स्वाहा । बुध ग्रहाय इदं न मम ॥
oṁ hrīṁ śrīṁ saumya sarvān kāmān pūraya svāhā। budha grahāya idaṁ na mama ॥

### Guru

ॐ ऐं ॐ सुर-गुरो अभीष्टं यच्छ स्वाहा । गुरु ग्रहाय इदं न मम ॥
oṁ aiṁ oṁ sura-guro abhīṣṭaṁ yaccha svāhā। guru grahāya idaṁ na mama ॥

### Śukra

ॐ शां शीं शूं शैं शौं शः शुक्राय स्वाहा । शुक्र ग्रहाय इदं न मम ॥
oṁ śāṁ śīṁ śūṁ śaiṁ śauṁ śaḥ śukrāya svāhā। śukra grahāya idaṁ na mama ॥

### Sani

ॐ ह्रां ह्रीं ह्रीं ह्रीं सर्व शत्रून् विद्रावय विद्रावय मार्तंड सूनवे नमः - शनैश्चराय स्वाहा । शनि ग्रहाय इदं न मम
oṁ hrāṁ hrīṁ hrīṁ hrīṁ sarva śatrūn vidrāvaya vidrāvaya mārtaṇḍa sūnave namaḥ - śanaiścarāya svāhā। śani grahāya idaṁ na mama।

**Rāhu**

ॐ रां ह्रौं ह्रैं ह्रीं सोम शत्रोः शत्रून् विध्वंसय विध्वंसय राहवे नमः । राहवे स्वाहा । राहवे इदं न मम ॥

oṁ rāṁ hrauṁ hraiṁ hrīṁ soma śatroḥ śatrūn vidhvaṁsaya vidhvaṁsaya rāhave namaḥ । rāhave svāhā । rāhave idaṁ na mama ॥

**Ketu**

ॐ क्रूं ह्रूं क्रैं केतवे स्वाहा । केतवे इदं न मम ॥

oṁ krūṁ hrūṁ kraiṁ ketave svāhā । ketave idaṁ na mama ॥

**viṣṇu** — *samit*

ॐ विष्णवे नमस्स्वाहा ॥ oṁ viṣṇave namas svāhā ॥

**brahmā** — *anna*

ॐ ब्रह्मणे नमस्स्वाहा ॥ oṁ brahmaṇe namas svāhā ॥

**rudra** — *ājya*

ॐ रुद्राय नमस्स्वाहा ॥ oṁ rudrāya namas svāhā ॥

**trayambaka** — *til*

त्र्यंबकं यजामहे सुगंधिं पुष्टि वर्धनम् । ऊर्वारुकम् इव बंधनान् मृत्योर् मुक्षीय माऽम्रुतात् स्वाहा ॥

tryambakaṁ yajāmahe sugandhiṁ puṣṭi vardhanam ।
ūrvārukam iva bandhanān mṛtyor mukṣīya mā'mrutāt svāhā ॥

**āyuṣya stotra** — *dūrva*

यदायुषं चिरं देवास्सप्त कल्यांत जीविषु । ददुस्तेनायुषा युक्ता जीवेम शरदश्शतम् ॥ १ ॥

yad āyuṣaṁ ciraṁ devās sapta kalyānta jīviṣu ।
dadus tenāyuṣā yuktā jīvema śaradaś śatam ॥ 1 ॥

*May the seven great immortals who have lived for a long time grant us longevity that we will live a hundred autumns.*

दीर्घा नागा नगा नद्योऽनंतास्सप्तार्णवा दिशः । अनंतेनायुषा तेन जीवेम शरदश्शतम् ॥ २ ॥

dīrghā nāgā nagā nadyo'nantās saptārṇavā diśaḥ ।
anantenāyuṣā tena jīvema śaradaś śatam ॥ 2 ॥

*There are long-lived serpents, mountains, rivers, vast oceans seven and directions. With that infinite life that surrounds us may we shall live for a hundred autumns.*

सत्यानि पंच-भूतानि विनाश रहितानि च । अविनाश्य्-आयुषा तद्वज्जीवेम शरदश्शतम् ॥ ३ ॥

satyāni pañca-bhūtāni vināśa rahitāni ca ।
avināśy-āyuṣā tadvaj jīvema śaradaś śatam ॥ 3 ॥

*The five elements are abiding and free from destruction. Just so may we live for a hundred autumns with indestructible health.*

- Uttarangam

## Maṅgalaṁ

मंगलं भगवान् विष्णुः मंगलं मधुसूदनः । मंगलं पुंडरीकाक्ष मंगलं गरुड-ध्वज ॥ १ ॥

maṅgalaṁ bhagavān viṣṇuḥ maṅgalaṁ madhusūdanaḥ ।
maṅgalaṁ puṇḍarīkākṣa maṅgalaṁ garuḍa-dhvaja ॥ 1 ॥

*May Lord Vishnu and Lord Madhusūdana bestow all auspiciousness upon you. May the lotus-eyed one, O Garuda-dhvaja. Bestow prosperousness on you.*

नमः कमल नेत्राय नमः कमल मालिने । नमः कमल नाभाय कमला पतये नमः ॥ २ ॥

namaḥ kamala netrāya namaḥ kamala māline |
namaḥ kamala nābhāya kamalā pataye namaḥ || 2 ||

*O lotus-eyed one, O lotus-garlanded one, I offer my obeisances to you. O lotus-naveled lotus-bearer, I offer my respectful obeisances unto You.*

श्रीयः कांताय कल्याण निधये निधयेर्थिनाम् । श्री वेंकट निवासाय श्री निवासाय मंगलं ॥ ३ ॥

śrīyaḥ kāntāya kalyāṇa nidhaye nidhayerthinām |
śrī veṅkaṭa nivāsāya śrī nivāsāya maṅgalaṁ || 3 ||

*The goddess of fortune is the beloved, the well-being, the treasure of those who seek treasure. O Lord Venkata, you are the abode of Lord Śrī.*

मंगलं कौसलेंद्राय महनि रघुनात्मने । चक्रवर्ति तनुजाय सर्व भौमाय मंगलं ॥ ४ ॥

maṅgalaṁ kausalendrāya mahani raghunātmane |
cakravarti tanujāya sarva bhaumāya maṅgalaṁ || 4 ||

*Good fortune to the great Kausalya, the soul of the Raghus. May all good fortune be extended to the son of Chakravarti, the earthly King.*

वेद वेदांत वेध्याय मेघश्यामल मूर्तये । पुंसां मोहन रूपाय पुण्य श्लोकाय मंगलं ॥ ५ ॥

veda vedānta vedhyāya meghaśyāmala mūrtaye |
puṁsāṁ mohana rūpāya puṇya ślokāya maṅgalaṁ || 5 ||

*O Veda Vedanta all-knowing, the colour of a dark-rain cloud, O most auspicious one, your form is bewitching to all beings.*

सर्व मंगल मांगल्ये शिवे सर्वार्थ शादिके । शरणे त्रयंबके गौरि नारायणी नमोऽस्तु ते ॥ ६ ॥

sarva maṅgala māṅgalye śive sarvārtha śādike |
śaraṇe trayambake gauri nārāyaṇī namo'stu te || 6 ||

*O auspicious one, O most auspicious one, O Shiva, O accomplisher of all purposes. O goddess Gauri, Nārāyaṇī, I offer my respectful obeisances unto you.*

## MAHAD-ĀŚIRVĀDAM

श्री महद्भ्यो नमः !

स्वस्ति मंत्रार्थाः सत्यास् सफलास् संतु इति भवंतो महांतो अनुगृह्णंतु ॥ १ ॥

śrī mahadbhyo namaḥ !

svasti mantrārthāḥ satyās saphalās santu iti bhavanto mahānto anugṛhṇantu || 1 ||

*Reverend sirs! With your blessing may all the mantras that have been recited yield their stated rewards.*

अस्य मुहूर्तः सुमुहूर्तो भूयाद् इति भवंतो महांतो अनुगृह्णंतु ॥ २ ॥

asya muhūrtaḥ sumuhūrto bhūyād iti bhavanto mahānto anugṛhṇantu || 2 ||

*Reverend sirs! With your blessing may this moment be considered as most auspicious..*

तल्-लग्न अपेक्षया आदित्यादि नवानां ग्रहानाम् आनुकूल्यं भूयाद् इति भवंतो महांतो अनुगृह्णंतु ॥ ३ ॥

tal-lagna apekṣayā ādityādi navānāṁ grahānām ānukūlyaṁ bhūyād iti bhavanto mahānto anugṛhṇantu || 3 ||

*Reverend sirs! With your blessing in spite of the ascendant sign, mall the Planets be well disposed.*

ये ये ग्रहाः शुभेतर-स्थानेषु स्थिताः तेषां ग्रहाणाम् शुभ स्थान फल अवाप्तिर्-अस्विति भूयाद् इति भवंतो महांतो अनुगृह्णंतु ॥ ४ ॥

ye ye grahāḥ śubhetara-sthāneṣu sthitāḥ teṣāṁ grahāṇām śubha sthāna phala avāptir-asviti bhūyād iti bhavanto mahānto anugṛhṇantu || 4 ||

*May all those planets situated in inauspicious houses yield the rewards of their positive states.*

ये ये ग्रहाः शुभ-स्थानेषु स्थिताः तेषां ग्रहाणाम् अतिशयेन एकादश शुभ स्थान फल अवाप्तिर्-अस्विति भूयाद् इति भवंतो महांतो अनुगृह्णंतु ॥ ५ ॥

ye ye grahāḥ śubha-sthāneṣu sthitāḥ teṣāṁ grahāṇām atiśayena ekādaśa śubha sthāna phala avāptir-asviti bhūyād iti bhavanto mahānto anugṛhṇantu || 5 ||

*May all those planets situated in auspicious houses yield the greatest rewards of the eleventh house position.*

अस्या कुमार्या शास्त्रोक्त दीर्घं आयुष्यं भूयाद् इति भवंतो महांतो अनुगृह्णंतु ॥ ६ ॥

asyā kumāryā śāstrokta dīrghaṁ āyuṣyaṁ bhūyād iti bhavanto mahānto anugṛhṇantu || 6 ||

*May this girl obtain the longevity that is mentioned in the scriptures.*

अस्या कुमार्या क्षेम स्थैर्य धैर्य सौर्य वीर्य विजय आयुर् आरोग्य ऐश्वर्य अभिवृद्धिः भूयाद् इति भवंतो महांतो अनुगृह्णंतु ॥ ७ ॥

asyā kumāryā kṣema sthairya dhairya saurya vīrya vijaya āyur ārogya aiśvarya abhivṛddhiḥ bhūyād iti bhavanto mahānto anugṛhṇantu || 7 ||

*May this girl always enjoy increase of wellbeing, security, steadfastness, courage, energy, vicotory, longevity, health and prosperity.*

सर्वे जनाः नीरोगाः निर्-उपद्रवाः सद्-आचार-संपन्ना आढ्या निर्-मत्सर दयालवश्च भूयासुर् इति भवंतो महांतो अनुगृह्णंतु ॥ ८ ॥

sarve janāḥ nīrogāḥ nir-upadravāḥ sad-ācāra-sampannā āḍhyā nir-matsara dayālavaśca bhūyāsur iti bhavanto mahānto anugṛhṇantu || 8 ||

*May all people be free from disease and suffering, may they all be of good character and prosperous, may all people be compassionate and free from jealousy.*

देशो ऽयं निर्-उपद्रवो अस्तु । सर्वे जनाः सुखिनो भवंतु ॥ ९ ॥

deśo 'yaṁ nir-upadravo astu | sarve janāḥ sukhino bhavantu || 9 ||

*May this country be free of troubles. and may everyone attain happiness.*

समस्त सन्मंगलानि संतु । उत्तरोत्तर अभिवृद्धिर् अस्तु ॥ १० ॥

samasta sanmaṅgalāni santu | uttarottara abhivṛddhir astu || 10 ||

*May there always be auspiciousness, always increasing.*

# ĀYUṢYA HOMAM

❖ Perform the usual preliminaries.

**Saṅkalpaṁ** — मम [अस्य यजमानस्य] उपात समस्त दुरित-क्षय द्वारा, श्री परमेश्वर प्रीत्यर्थं [भगवद् आज्ञया भगवद् कैंकर्य रूपं] — मम कुमर्याह्/कुमारस्य अब्द-पूर्तौ आयुष्य अभिवृद्ध्यर्थं आयुष्य होमं करिष्ये ।

mama [asya yajamānasya] upāta samasta durita-kṣaya dvārā, śrī parameśvara prītyarthaṁ [bhagavad ājñayā bhagavad kaiṅkarya rūpaṁ] — mama kumaryāh/kumārasya abda-pūrtau āyuṣya abhivṛddhyarthaṁ āyuṣya homaṁ kariṣye |

*On the auspicious occasion of my child's 1st birthday I will perform the ceremony of long-life.*

❖ In the kalaśe invoke the following:–

अस्मिन् पूर्व स्थापित कुंभे — गणपतिम्, ___________ नक्षत्र देवतम्, मर्कंडेयम्, व्यासम्, रामम्, अश्वत्थामम्, बलिम्, हनुमंतम्, विभीषणम्, कृपः, परशुरामम्, प्रजापतिम्, कुमुदम्, कलिम्, सरस्वतिम्, सावित्रीम्, ब्रह्मम्, सतिम्, सम्ज्ञाम्, मेधाम्, पुष्टीम्, तुष्टीम्, आत्मन कुल देवतम्, सूर्यादि नवग्रहानाम्, सकल देवतानाम् ध्यायामि आवाहयामि स्थापयामि ॥

asmin pūrva sthāpita kumbhe — gaṇapatim, ___________ nakṣatra devatam, markaṇḍeyam, vyāsam, rāmam, aśvatthāmam, balim, hanumantam, vibhīṣaṇam, kṛpaḥ, paraśurāmam, prajāpatim, kumudam, kalim, sarasvatim, sāvitrīm, brahmam, satim, samjñām, medhām, puṣṭīm, tuṣṭīm, ātmana kula devatam, sūryādi nava-grahānām, sakala devatānām dhyāyāmi āvāhayāmi sthāpayāmi ||

स्वामिनः सर्व-जगनाथाः यावात् पूजावसानकम्, तावात् यूयं प्रीति भावेन कुंभेष्वेषु सन्निधिम् कुरुत ॥
svāminaḥ sarva-jaganāthāḥ yāvāt pūjāvasānakam, tāvāt yūyaṁ prīti bhāvena kumbheṣveṣu sannidhim kuruta ||

आवाहिता भवत । स्थापिता भवत । सन्निधा भवत । सन्निरुद्धा भवत । सन्निहिता भवत । प्रसीदत ॥
āvāhitā bhavata | sthāpitā bhavata | sannidhā bhavata | sanniruddhā bhavata |
sannihitā bhavata | prasīdata ||

❖ Offer the 16 upacāras

पुष्पै पूजयामि — ॐ मर्कंडेयाय नमः । व्यासाय । रामाय । अश्वत्थामाय । बलये । हनुमते । विभीषणाय । कृपाय । परशुरामाय । प्रजापतये । कुमुदाय । कलये । सरस्वत्यै । सावित्र्यै । ब्रह्मने । सत्यै । सम्ज्ञायै । मेधायै । पुष्ट्यै । तुष्ट्यै । आत्मन कुल देवताय । सूर्याय । चंद्राय । भौमाय । बुधाय । वाग्-कृते । भृगवे । शनैश्-चराय । राहवे । ॐ केतवे नमः ॥

Puṣpai pūjayāmi — oṁ markaṇḍeyāya namaḥ | vyāsāya | rāmāya | aśvatthāmāya | balaye | hanumate | vibhīṣaṇāya | kṛpāya | paraśurāmāya | prajāpataye | kumudāya | kalaye | sarasvatyai | sāvitryai | brahmane | satyai | samjñāyai | medhāyai | puṣṭyai | tuṣṭyai | ātmana kula devatāya | sūryāya | candrāya | bhaumāya | budhāya | vāg-kṛte | bhṛgave | śanaiś-carāya | rāhave | oṁ ketave namaḥ ||

❖ Prepare for homa:–

## Agni-mukham

ॐ भूर्भुवस्सुवः बलदा नाम अग्निम् आवाहयामि स्थापयामि ।
ॐ बलदा नाम अग्नये नमः । सुप्रतिष्ठो वरदो भव ॥

oṁ bhūr-bhuvas-suvaḥ baladā nāma agnim āvāhayāmi sthāpayāmi |
oṁ baladā nāma agnaye namaḥ | supratiṣṭho varado bhava ||

❖ Offer oblations with ghee, grains or lāja 3 or 9 times with each mantra:–

## Navagraha homam

सूर्य — ॐ आरोग्यदाय स्वाहा । सूर्याय इदं न मम ॥
**Sūrya** — oṁ ārogyadāya svāhā | sūryāya idaṁ na mama ||
चंद्र — ॐ क्लीं ह्रीं ऐं अमृत करामृतं प्लावय प्लावय स्वाहा । सोमग्रहाय इदं ॥
**Candra** — oṁ klīṁ hrīṁ aiṁ amṛta karāmṛtaṁ plāvaya plāvaya svāhā | somagrahāya idaṁ ||
अंगारक — ॐ ऐं ह्रां ह्रीं सर्व दुष्टान्-नाशय नाशय स्वाहा । कुज ग्रहाय इदं ॥
**Aṅgāraka** — oṁ aiṁ hrāṁ hrīṁ sarva duṣṭān-nāśaya nāśaya svāhā | kuja grahāya idaṁ ||
बुध — ॐ ह्रीं श्रीं सौम्य सर्वान् कामान् पूरय स्वाहा । बुध ग्रहाय इदं न मम ॥
**Budha** — oṁ hrīṁ śrīṁ saumya sarvān kāmān pūraya svāhā | budha grahāya idaṁ na mama ||
गुरु — ॐ ऐं ॐ सुर-गुरो अभीष्टं यच्छ स्वाहा । गुरु ग्रहाय इदं न मम ॥
**Guru** — oṁ aiṁ oṁ sura-guro abhīṣṭaṁ yaccha svāhā | guru grahāya idaṁ na ||
शुक्र — ॐ शां शीं शूं शैं शौं शः शुक्राय स्वाहा । शुक्र ग्रहाय इदं न मम ॥
**Śukra** — oṁ śāṁ śīṁ śūṁ śaiṁ śauṁ śaḥ śukrāya svāhā | śukra grahāya idaṁ na mama ||
सनि — ॐ ह्रां ह्रीं ह्रीं ह्रीं सर्व शत्रून् विद्रावय विद्रावय मार्त्तंड सूनवे नमः - शनैश्चराय स्वाहा । शनि ग्रहाय
**Sani** — oṁ hrāṁ hrīṁ hrīṁ hrīṁ sarva śatrūn vidrāvaya vidrāvaya mārttaṇḍa sūnave namaḥ - śanaiścarāya svāhā | śani grahāya idaṁ na mama ||
इदं न मम ॥
राहु — ॐ रां ह्रौं ह्रैं ह्रीं सोम शत्रोः शत्रून् विध्वंसय विध्वंसय राहवे नमः । राहवे स्वाहा । राहवे इदं ॥
**Rāhu** — oṁ rāṁ hrauṁ hraiṁ hrīṁ soma śatroḥ śatrūn vidhvaṁsaya vidhvaṁsaya rāhave namaḥ | rāhave svāhā | rāhave idaṁ na mama ||
केतु — ॐ क्रूं ह्रूं क्रैं केतवे स्वाहा । केतवे इदं न मम ॥
**Ketu** — oṁ krūṁ hrūṁ kraiṁ ketave svāhā | ketave idaṁ na mama ||

## āyuṣya homa

❖ Offer oblations with ghee, lāja or dūrva diped in ghee with each mantra:–

चिरन्जिवि यथा त्वांतु मुनिनाम् प्रवर द्विजः । कुरुष्व मुनिशार्दूल तथा माम् आयुः जीवनं स्वाहा ॥ १ ॥

ciranjivi yathā tvāntu munināṁ pravara dvijaḥ |
kuruṣva muniśārdūla tathā māṁ āyuḥ jīvanaṁ svāhā || 1 ||

*May you live long, O best of the sages, O brāhmaṇa. O tiger among ascetics, please grant me long life and life.*

चिरंजीविभ्यो इदं न मम ॥ cirañjīvibhyo idaṁ na mama ||

मार्कंडेय महा-भाग सप्त कल्पांत जिवना । आयुरारोग्य सिद्ध्यर्थं प्रसीद भगवन् मुने स्वाहा ॥ २ ॥
mārkaṇḍeya mahā-bhāga sapta kalpānta jivanā |
āyur ārogya siddhyarthaṁ prasīda bhagavan mune svāhā || 2 ||

*Markandeya Maha-bhaga lives in seven kalpas. O great sage, please be merciful to me for long life, health and perfection.*

मार्कंडेय इदं न मम ॥ mārkaṇḍeya idaṁ na mama ||

ब्रह्म-सूत्रोज्वल भुजो राजत् कृष्णाजिन्-आसनः । अश्वत्थामा चिरंजीवि दीर्घम् आयुर् ददातु ते स्वाहा ॥ ३
brahma-sūtrojvala bhujo rājat kṛṣṇājin-āsanaḥ |
aśvatthāmā cirañjīvi dīrgham āyur dadātu te svāhā || 3 ||

*Radiant with Brahma thread, with strong arms, and he sits on a shining black deerskin seat. May Ashvatthama grant you long life and long life*

अश्वत्थामाय इदं न मम ॥ aśvatthāmāya idaṁ na mama ||

बलिः पाताल्अ-निलयो धनुर्-बाण धरोऽसुरः । विष्णु पादांकित शुराः दीर्घम् आयुर्ददातु ते स्वाहा ॥ ४
baliḥ pātāḷa-nilayo dhanur-bāṇa dharo'suraḥ |
viṣṇu pādāṅkita śurāḥ dīrgham āyur dadātu te svāhā || 4 ||

*Bali is the Asura who lives in the underworld and holds bows and arrows. May the heroes touched by the feet of Lord Viṣṇu grant you long life.*

बलये इदं न मम ॥ balaye idaṁ na mama ||

व्यासस् सर्व पुराणानां वक्ता मुनि-वरेडितः । जटिलस्सर्व शास्त्रज्ञो दीर्घम् आयुर्ददातु ते स्वाहा ॥ ५ ॥
vyāsas sarva purāṇānāṁ vaktā muni-vareḍitaḥ |
jaṭilas sarva śāstrajño dīrgham āyur dadātu te svāhā || 5 ||

*Vyasa was the orator of all the Puranas and was blessed by the sages May Jatila, who is well versed in all scriptures, grant you long life.*

व्यासाय इदं न मम ॥ vyāsāya idaṁ na mama ||

हनुमान् राम-पादाब्ज संगो-वर्णि वरश्शुचिः । ओषध्यस्समाहर्ता दीर्घम् आयुर्ददातु ते स्वाहा ॥ ६ ॥
hanumān rāma-pādābja saṅgo-varṇi varaś-śuciḥ |
oṣadhyas samāhartā dīrgham āyur dadātu te svāhā || 6 ||

*Hanuman is at the lotus feet of Rama, the best of associates, and he is immaculate. May the collector of herbs grant you long life.*

हणुमते इदं न मम ॥ haṇumate idaṁ na mama ||

विभीषण धर्म-परो रामार्चन परायणः । जितेंद्रियश् चिरंजीवी दीर्घम् आयुर्ददातु ते स्वाहा ॥ ७ ॥
vibhīṣaṇa dharma-paro rāmārcana parāyaṇaḥ |
jitendriyaś cirañjīvī dīrgham āyur dadātu te svāhā || 7 ||

*Vibhishana was a strict observer of Dharma and devoted to the worship of Rama. May he who has conquered his senses live a long life and grant you a long life.*

विभीषणाय इदं न मम ॥ vibhīṣaṇāya idaṁ na mama ||

कृपः कृपा पयो-राशिः तपस्वी सर्व वेद-वित् । पांडवैः पूजनीयात्मा दीर्घम् आयुर् ददातु ते स्वाहा ॥ ८ ॥

kṛpaḥ kṛpā payo-rāśiḥ tapasvī sarva veda-vit ।
pāṇḍavaiḥ pūjanīyātmā dīrgham āyur dadātu te svāhā ॥ 8 ॥

*Kṛpa is the source of great compassion and is an ascetic and knows all the Vedas. May the great-one worshiped by the Pāṇḍavas grant you long life.*

क्रिपया इदं न मम ॥ kripayā idaṁ na mama ॥

परशू ज्वल-हस्ताब्जः चंड कोदंड मंडितः । ददात् चिरंजीवित्वं प्रसन्नात्मा भृगूद्-वह स्वाहा ॥ ९ ॥

paraśū jvala-hastābjaḥ caṇḍa kodaṇḍa maṇḍitaḥ ।
dadāt cirañjīvitvaṁ prasannātmā bhṛgūd-vaha svāhā ॥ 9 ॥

*Parashurama is fierce and holds a flaming axe in his palm and is equipped with a powerful bow. May the peaceful descendant of Bhrigu grant you long life.*

परशुरामाय इदं न मम ॥ paraśurāmāya idaṁ na mama ॥

चिरन्जिवि श्रीया युतस्य सर्वदा मार्कंडेय नमस्तेस्तु सप्त कल्पांत जीवन अयुररोग्य सिद्ध्यर्थं प्रसीद भगवान् मुनैः ॥

ciranjivi śrīyā yutasya sarvadā mārkaṇḍeya namastestu sapta kalpānta jīvana
ayur arogya siddhyarthaṁ prasīda bhagavān munaiḥ ॥

*O son of Mārkaṇḍeya, I offer my respectful obeisances unto you. May you live a long life and be endowed with all opulences. Please be merciful to the sages.*

❖ offer oblation of ghee with the names of the invoked deities.

ॐ गणपतये स्वाहा । अश्वत्थामाय ० । बलि-महावीराय ० । व्यासाय ० । हनुमते ० । विभीषणाय ० । कृपाय ० । परशुरामाय ० । मार्कंडेयाय ० । रामाय ० । प्रजापतये ० । कुमुदाय ० । कलये ० । सरस्वत्यै ० । सावित्र्यै ० । ब्रह्मणे ० । सत्यै ० । सम्ज्ञायै ० । मेधायै ० । पुष्ट्यै ० । तुष्ट्यै ० । आत्मन कुल देवताय स्वाहा ॥

oṁ gaṇapataye svāhā । aśvatthāmāya 0 । bali-mahāvīrāya 0 । vyāsāya 0 । hanumate 0 । vibhīṣaṇāya 0 । kṛpāya 0 । paraśurāmāya 0 । mārkaṇḍeyāya 0 । rāmāya 0 । prajāpataye 0 । kumudāya 0 । kalaye 0 । sarasvatyai 0 । sāvitryai 0 । brahmaṇe 0 । satyai 0 । samjñāyai 0 । medhāyai 0 । pusṭyai 0 । tusṭyai 0 । ātmana kula devatāya svāhā ॥

## Nakṣatra & adhidevata Homa.

- ❖ See page 122 for the Nakshatra Gāyatri mantras.
- ❖ Oblations can also be made with the Mahā mṛtyuñjaya mantra. 27, 50 or 108 times.
- ❖ Uttarāṅgam, offer naivedya
- ❖ Offer the child milk with jaggery to taste.

**prāśana sloka**

दुग्धं गूडं सम्युक्तं ज्वलदम् अमितं वयः । मार्कंडेयात् वरं लब्ध्वापि आयुः अभिवृद्धये ॥

dugdhaṁ gūḍaṁ samyuktaṁ jvaladam amitaṁ vayaḥ ।
mārkaṇḍeyāt varaṁ labdhvāpi āyuḥ abhivṛddhaye ॥

**āyuṣya ślokas**

यद् आयुषं चिरं देवास्सप्त कल्यांत जीविषु । ददुस्तेनायुषा युक्ता जीवेम शरदः शतम् ॥ १ ॥

yad āyuṣaṁ ciraṁ devās sapta kalyānta jīviṣu ।
dadus tenāyuṣā yuktā jīvema śaradaḥ śatam ॥ 1 ॥

दीर्घा नागा नगा नद्योऽनंतास् सप्तार्णवा दिशः । अनंतेनायुषा तेन जीवेम शरदः शतम् ॥ २ ॥

dīrghā nāgā nagā nadyo'nantās saptārṇavā diśaḥ |
anantenāyuṣā tena jīvema śaradaḥ śatam || 2 ||

सत्यानि पंच-भूतानि विनाश रहितानि च । अविनाश्य्-आयुषा तद्वज् जीवेम शरदः शतम् ॥ ३ ॥

satyāni pañca-bhūtāni vināśa rahitāni ca |
avināśy-āyuṣā tadvaj jīvema śaradaḥ śatam || 3 ||

**Abhiṣeka**

रविः सोमो मंगलश्च बुधो जीवः सितः शनिः ।राहुः केतुः स-नक्षत्रा अभिषिंचंतु ते ग्रहाः ॥
सुरस्त्वाम् अभिषिंचंतु ब्रह्म-विष्णु-महेश्वराः ।

raviḥ somo maṅgalaśca budho jīvaḥ sitaḥ śaniḥ |
rāhuḥ ketuḥ sa-nakṣatrā abhiṣiñcantu te grahāḥ ||
suras tvām abhiṣiñcantu brahma-viṣṇu-maheśvarāḥ |

*May the Sun, Moon, Mars, Mercury, Jupiter, Venus, Saturn, Rahu, Ketu and their constellations consecrate you. May the Devas, Brahmā, Viṣṇu and Maheśvara, consecrate you.*

**Śānti Pāṭhaḥ**

ॐ द्यौश्शान्तिरन्तरिक्षगुं शान्तिः पृथिवी शान्तिराप शान्तिरोषधय शान्तिः । वनस्पतय शान्तिर्विश्वेदेवाश्शान्तिर्ब्रह्म शान्तिस्सर्वगुं शान्तिश्शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

oṁ dyauś śāntir antarikṣaguṁ śāntiḥ pṛthivī śāntir āpa śāntir oṣadhaya śāntiḥ | vanaspataya śāntir viśvedevāś śāntir brahma śāntis sarvaguṁ śāntiś śāntir eva śāntis sā mā śāntir edhi || oṁ śāntiś śāntiś śāntiḥ ||

## Mahad-āśirvādam

श्री महभ्यो नमः ! śrī mahabhyo namaḥ !

स्वस्ति मंत्रार्थाः सत्याः सफलाः संतु इति भवंतो महांतो अनुगृह्णंतु ॥ १ ॥
svasti mantrārthāḥ satyās saphalāḥ santu iti bhavanto mahānto anugṛhṇantu || 1 ||
*Reverend sirs! With your blessing may all the mantras that have been recited yield their stated rewards.*

अस्य मुहूर्तः सुमुहूर्तो भूयाद् इति भवंतो महांतो अनुगृह्णंतु ॥ २ ॥
asya muhūrtaḥ sumuhūrto bhūyād iti bhavanto mahānto anugṛhṇantu || 2 ||
*Reverend sirs! With your blessing may this moment be considered as most auspicious..*

तल्-लग्न अपेक्षया आदित्यादि नवानां ग्रहानाम् आनुकूल्यं भूयाद् इति भवंतो महांतो अनुगृह्णंतु ॥ ३ ॥
tal-lagna apekṣayā ādityādi navānāṁ grahānām ānukūlyaṁ bhūyād iti bhavanto mahānto anugṛhṇantu || 3 ||
*Reverend sirs! With your blessing in spite of the ascendant sign, mall the Planets be well disposed.*

ये ये ग्रहाः शुभेतर-स्थानेषु स्थिताः तेषां ग्रहाणां शुभ स्थान फल अवाप्तिर्-अस्विति भूयाद् इति भवंतो महांतो अनुगृह्णंतु ॥ ४ ॥
ye ye grahāḥ śubhetara-sthāneṣu sthitāḥ teṣāṁ grahāṇāṁ śubha sthāna phala avāptir-asviti bhūyād iti bhavanto mahānto anugṛhṇantu || 4 ||
*May all those planets situated in inauspicious houses yield the rewards of their positive states.*

ये ये ग्रहाः शुभ-स्थानेषु स्थिताः तेषां ग्रहाणाम् अतिशयेन एकादश शुभ स्थान फल अवाप्तिरस्विति भूयाद् इति भवंतो महांतो अनुगृह्णंतु ॥ ५ ॥
ye ye grahāḥ śubha-sthāneṣu sthitāḥ teṣāṁ grahāṇām atiśayena ekādaśa śubha sthāna phala avāptir-asviti bhūyād iti bhavanto mahānto anugṛhṇantu || 5 ||
*May all those planets situated in auspicious houses yield the greatest rewards of the eleventh house position.*

अस्या कुमार्या /अस्य कुमारस्य शास्त्रोक्त दीर्घं आयुष्यं भूयाद् इति भवंतो महांतो अनुगृह्णंतु ॥ ६ ॥
asyā kumāryā /asya kumārasya śāstrokta dīrghaṁ āyuṣyaṁ bhūyād iti bhavanto mahānto anugṛhṇantu || 6 ||
*May this girl/boy obtain the longevity that is mentioned in the scriptures.*

अस्या कुमार्या /अस्य कुमारस्य क्षेम स्थैर्य धैर्य सौर्य वीर्य विजय आयुरारोग्य ऐश्वर्य अभिवृद्धिः भूयाद् इति भवंतो महांतो अनुगृह्णंतु ॥ ७ ॥
asyā kumāryā /asya kumārasya kṣema sthairya dhairya saurya vīrya vijaya āyur ārogya aiśvarya abhivṛddhiḥ bhūyād iti bhavanto mahānto anugṛhṇantu || 7 ||
*May this girl/boy always enjoy increase of wellbeing, security, steadfastness, courage, energy, vicotory, longevity, health and prosperity.*

सर्वे जनाः नीरोगाः निर्-उपद्रवाः सद्-आचार-संपन्ना आढ्या निर्मत्सर दयालवश्च भूयासुर् इति भवंतो महांतो अनुगृह्णंतु ॥ ८ ॥
sarve janāḥ nīrogāḥ nir-upadravāḥ sad-ācāra-sampannā āḍhyā nir-matsara dayālavaśca bhūyāsur iti bhavanto mahānto anugṛhṇantu || 8 ||
*May all people be free from disease and suffering, may they all be of good character and prosperous, may all people be compassionate and free from jealousy.*

देशो ऽयं निर्-उपद्रवोऽस्तु । सर्वे जनाः सुखिनो भवंतु ॥ ९ ॥
deśo 'yaṁ nir-upadravo'stu | sarve janāḥ sukhino bhavantu || 9 ||
*May this country be free of troubles. and may everyone attain happiness.*

समस्त सन्मंगलानि संतु । उत्तरोत्तर अभिवृद्धिरस्तु ॥ १० ॥
samasta sanmaṅgalāni santu | uttarottara abhivṛddhir astu || 10 ||
*May there always be auspiciousness, always increasing.*

## Aśīrvādam for an ill person

श्रीमन्/श्रीमति ……………। सर्व विध रोग निवारनार्थं ।
आयुर् आरोग्य दिर्घायूर् अभिवृध्यर्थं समस्त रोग विहीन सुस्वास्थ्य प्राप्त्यर्थं ।
भगवन् श्री महा देव आशिर्वदाः प्राप्तिरस्तु ॥ भगवती श्री महा देव्यैः आशिर्वदाः प्राप्तिरस्तु ॥
śrīman/śrīmati ……………. sarva vidha roga nivāranārthaṁ |
āyur ārogya dirghāyūr abhivṛdhyarthaṁ
samasta roga vihīna susvāsthya prāptyarthaṁ |
bhagavan śrī mahā deva āśirvadāḥ prāptir astu ||
bhagavatī śrī mahā devyaiḥ āśirvadāḥ prāptir astu ||
*Mr./Mrs ............... To prevent all kinds of diseases.*
*To increase longevity, health and longevity, and to attain good health, free from all diseases.*
*O Lord, Śrī Mahādeva, may you bestow blessings upon us and may we attain them. May the goddess Śrī Mahā Devi bestow blessings upon you.*

# ṢAṢṬHĪ MAHOTSAVA VIDHIḤ
## Birthday anniversary

Ṣaṣṭhi (Six) refers to 2 hands 2 feet, torso and head — the force that supports these 6 body parts is called ṣaṣṭhi devī she is the wife of Skanda also known as Devasenā.
She is invoked to promote the health and vitality of the body and to ensure a long and healthy life on every birthday.

### Pūrvāṅgam

संकल्पम् — हरिः ॐ तत्सत् । ............... मम [अस्य यजमानस्य] उपात समस्त दुरित-क्षय द्वारा, श्री परमेश्वर प्रीत्यर्थं [भगवद् आज्ञया भगवद् कैंकर्य रूपं] — अस्य अर्भकस्य अखिल उपद्रव निवारणार्थं तथा बालकस्य आयुर् आरोग्य अभिवृद्ध्यर्थं सर्वा बाधा निवृत्ति हेतवे, प्रद्युम्न स्कंदयोः पूजन पूर्वकं षष्ठि देव्याश्च यथा लब्धोपचारैः पूजनं करिष्ये ॥

**saṅkalpam —** hariḥ oṁ tatsat | .................... mama [asya yajamānasya] upāta samasta durita-kṣaya dvārā, śrī parameśvara prītyarthaṁ [bhagavad ājñayā bhagavad kaiṅkarya rūpaṁ] — asya arbhakasya akhila upadrava nivāraṇārthaṁ tathā bālakasya āyur ārogya abhivṛddhyarthaṁ sarvā bādhā nivṛtti hetave, pradyumna skandayoḥ pūjana pūrvakaṁ ṣaṣṭhi devyāśca yathā labdhopacāraiḥ pūjanaṁ kariṣye ||

*"For the prevention of all problems of this child and for the flourishing of his health and life, and for the removal of all obstacles, I will perform the worship of Pradyumna and Skanda, as well as the worship of the Goddess Shashti with proper rituals and devotion."*

### Dhyānam

द्विभुजां हेम गौरांगीं रत्नालंकार भूषिताम् । वरदाभय हस्तांच शरच्चंद्र निभाननाम् ॥
पीत वस्त्रं परीधानां पीनोन्नत पयो-धराम् । पद्म पत्र विसालाक्षीं सर्व पुत्रैक मातरम् ॥
अंकापित सुतां षष्ठिम् अंबुजस्थां अहं भजे ।

dvibhujāṁ hema gaurāṅgīṁ ratnālaṅkāra bhūṣitām |
varadābhaya hastāñca śaraccandra nibhānanām ||
pīta vastra parīdhānāṁ pīnonnata payo-dharām |
padma patra visālākṣīṁ sarva putraika mātaram ||
aṅkāpita sutāṁ ṣaṣṭhim ambujasthāṁ ahaṁ bhaje |

*She had two arms, fair limbs, and is adorned with jewels and ornaments. Her hands show the gestures fearlessness and of charity, and her face is like the autumn moon. She is dressed in yellow clothes and is buxom. She has large eyes like lotus petals and is the mother of six sons. I worship the Goddess daughter of Ankapita, who is situated in the lotus.*

ॐ आयाहि वरदे देवी महा षष्टीति विश्रुते । धात्री रूपेण मे पुत्रं षष्ठि जागर वासरे ॥

oṁ āyāhi varade devī mahā ṣaṣṭīti viśrute |
dhātrī rūpeṇa me putraṁ ṣaṣṭhi jāgara vāsare ||

ॐ षष्ठि देवी इहागच्छ इहा तिष्ठ वरदो भव ॥
oṁ ṣaṣṭhi devī ihāgaccha ihā tiṣṭha varado bhava ||

ॐ साधिदैवत स-प्रत्यधि दैवत विनायकादि पंचक सहित नवग्रहाः, दश दिक्पालाः इहा गच्छत इह तिष्ठत कार्तिकेयं

oṁ sādhidaivata sa-pratyadhi daivata vināyakādi pañcaka sahita navagrahāḥ,
daśa dikpālāḥ ihā gacchata iha tiṣṭhata |

**kārtikeyaṁ**

